THE BAPS SWAMINARAYAN RESEARCH
JOURNAL
बी.ए.पी.एस. स्वामिनारायण शोधपत्रिका
Volume 1 - Issue 1
April 2022

प्रस्थानत्रयीस्वामिनारायणभाष्ये ब्रह्मद्वयविचारः

Mahāmahopādhyāya Dr. N. S. Ramanuja Tatacharya

Disclaimer: Statements and opinions in the articles and reviews published within the BAPS Swaminarayan Research Journal are those of the respective authors and contributors and not of the Journal or the BAPS Swaminarayan Research Institute, New Delhi. Neither the Journal nor the BAPS Swaminarayan Research Institute makes any representation, expressed or implied, in respect of the accuracy of the material published within this journal and do not accept any legal responsibility or liability for any inaccuracies, errors, or omissions that may have been made.

https://doi.org/10.70855/bsrj/1.1-3
e-ISSN: 3048-9741
https://research.baps.org/journal

pp. 9-28

प्रस्थानत्रयीस्वामिनारायणभाष्ये ब्रह्मद्वयविचारः *

DR. N. S. RAMANUJA TATACHARYA
Mahāmahopādhyāya

Biographical Account

Prof. N. S. Ramanuja Tatacharya (1928-2017) was one of the most senior and renowned scholars in Navya-Nyāya and Rāmānuja Vedānta. Born in Navalpakkam, Tamil Nadu, he offered significant contributions to classical Sanskrit philosophical literature.

An erudite intellectual, learned Sanskritist, and a classical Sanskrit pundit, Dr. Ramanuja Tatacharya contributed to academia in different capacities. He served for several years as the Vice-Chancellor of Rashtriya Sanskrit Vidyapeeth, Tirupati and at the French Institute, Pondicherry. Dr. Tatacharya has to his credit more than fifteen reputed published works on classical Indian philosophy. His immense contribution to Sanskrit literature may be assessed from his various original scholarly works, which include among others, the *Vivṛti*, *Bālabodhinī*, *Bhagavadguṇaratnapīṭhikā*, and *Pratyakṣatattva-cintāmaṇivimarśa*. He has also offered several translations including that of the *Nyāyasiddhāñjanam* of Vedāntadeśika in Tamil. He served as the general editor to many scholarly works and has authored over 60 research papers on different philosophical topics. Under his guidance over 25 researchers have been awarded Ph.D. degrees on various subjects. He has also guided many scholars throughout the world. As an eminent intellectual, he has received many awards and honours including the Catuśśāstrapravīṇa, Mahāmahopādhyāya, Darśana Sārvabhauma, Paṇḍitaratnam, Sāstranidhi and the Vācaspati Puraskāra, K.K. Birla Foundation award.

* An English translation of this work is provided immediately following its original text.

Keywords: Darśana; Vedānta; Sanskrit literature; Sanskrit commentary; Prasthānatrayī; Upaniṣad; Bhagavadgītā; Brahmasūtras; Brahmavidyā; Svāmināràyaṇabhāṣya; Akṣara-Puruṣottama Darśana; Svāmināràyaṇa; Bhadreshdas Swami

प्रस्थानत्रयी

धर्मार्थकाममोक्षाऽऽख्येषु चतुर्विधेषु पुरुषार्थेषु मोक्षस्यैव प्राधान्यमिति सर्वेषां समादरः। स च पुनः परमात्मपरमोपासनलक्षणब्रह्मविद्यालभ्य इति तत्स्वरूपसाधनादिविशेषाश्च वेदान्ते प्रतिपाद्यन्ते इति निखिलवेदान्तिनां संप्रतिपन्नम्। प्रस्थाप्यते ब्रह्मविद्याऽनयाऽस्मिन् वेति प्रस्थानम्। त्रयाणां प्रस्थानानां समूहः प्रस्थानत्रयी। भारतीयवेदान्तपरम्परासु प्रस्थानत्रयी निखिलवेदान्ताऽनुयायिभिः समानाऽऽदरेण प्रमाणभूमौ प्रस्थापिता। उपनिषदो भगवद्गीता तथा च ब्रह्मसूत्राणीति शास्त्रत्रयसमुच्चयः प्रस्थानत्रयीति नाम्ना प्रख्यातिमाप्नोत्।

वेदान्ते ह्युपनिषदो मूर्धन्यप्रमाणम्। उप तथा च नि इत्युपसर्गद्वयपूर्वकात् सद्लृधातोश्च निष्पन्न उपनिषच्छब्दः। "उपनिषद्यते प्राप्यते ज्ञायते ब्रह्मविद्याऽनयेत्युपनिषदिति तदर्थः"। ताश्चर्गादिवेदसमाहिताः शताऽधिका अपि ईशादयो दश भूरि प्रसिद्धिमागताः। "ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥" इति च तत्संग्रहः। तास्वेतासु ब्रह्मविद्यैव प्रधानप्रतिपाद्यविषयः। एता उपनिषद एव प्रस्थानत्रय्यन्यतमाः श्रुतिप्रस्थानमिति संकीर्तिताः।

द्वियीयं प्रस्थानं श्रीमद्भगवद्गीता। सा च महाभारतग्रन्थाऽन्तर्गतभीष्मपर्वस्थिताऽष्टादशाऽध्यायेषु विभक्ताः सप्तशतश्लोकान् बिभर्ति। प्रत्यध्यायाऽन्ते "इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे..." इति संस्मरणादियमपि साक्षादुपनिषत्तया ब्रह्मविद्यात्मकतया योगशास्त्रतया च प्रस्तुता। "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महद्॥" इति प्रसिद्धमेव तस्या उपनिषदुक्तब्रह्मविद्यात्मकाऽमृतमयदुग्धरत्वम्। सा चेयं महाभारतान्तर्गतत्वादितिहास एव। तदस्यां पार्थपार्थसारथ्योश्च दिव्यसंवादो हि समरसमये समरभूमौ संजातः संग्रथितो महाभारतकारेण। स्मृतिप्रस्थानमितीयं प्रसिद्धा।

ब्रह्मसूत्राणि तृतीयं प्रस्थानम्। बादरायणेन रचितान्येतानि सूत्राणि। श्रुतिस्मृतिप्रतिपादितवेदान्तसिद्धान्तानामिह सप्रमाणं सयुक्तिकं च मीमांसाऽनुष्ठिता। वेदान्तवाक्यानां सत्यसमन्वयप्रकारः प्रदर्शितः। जगदुत्पत्तिविचारः सूत्रेषु निबद्धः। वेदान्तविरुद्धमतानि विमृष्टानि खण्डितान्यपि। मोक्षाऽनुकूलसाधनजातं प्रतिपादितम्। मोक्षस्वरूपमपि संदर्शितम्। इत्थं सहेतुकप्रस्थापनप्रवणतया प्रस्थानमिदं तर्कप्रस्थानमिति प्रसिद्धम्।

भाष्यपरम्परा

भाष्यपरम्परा हि भारतवर्षेऽतीव प्राचीनकालतः प्रारब्धा। वेदवदाङ्गादिप्राचीनशास्त्राणामुव्वट-महीधरसायणस्कन्दस्वाम्यादिकृतभाष्याणि पाणिन्यादिकृत- व्याकरणशास्त्रभाष्याणि रामायणादीतिहासशास्त्र-भाष्याणि भागवतादिपुराणशास्त्रभाष्याणि सांख्ययोगन्याय- वैशेषिकादिषड्दर्शनसूत्रभाष्याणि च प्रणीतानि प्रसिद्धिमातगतानि। सा चेयं भारतवर्षस्य प्रौढचिन्तनपरम्पराया वैचारिकस्वतन्त्रतायाश्च महत्प्रमाणम्।

तत्राऽपि विशेषतो वेदान्तशाखासु समये समये परिशीलनपुष्टा नूत्नतत्त्वविचाराः प्रकाशमानीताः। यथा उपनिषदः श्रीमद्भगवद्गीता ब्रह्मसूत्राणि चेति प्रस्थानत्रयीमाधारीकृत्य शङ्कररामानुजमध्ववल्लभाद्याचार्यप्रवरा वेदान्तशास्त्रे कृतभूरिपरिश्रमा अद्वैतविशिष्टाद्वैतद्वैतशुद्धाद्वैताद्यात्मकानां स्वस्वसम्प्रदायाऽनुकूलानां दर्शनानां प्रतिपादकान् भाष्यग्रन्थान् निरमासिषुः।

२१तमशताब्देः अभिनवं भाष्यम्

अयमेव भारतवर्षस्य वैदिकसनातनधर्मस्य प्रौढचिन्तनपरम्पराया महिमा यत् प्राचीनतमाऽपि

भाष्यप्रणयनपरम्पराऽद्याऽपि नवीनतमविचाराऽऽविष्कारवैभवेन तथैव समाजमुपकरोति यथा प्राक्काले उपचकार। साधुभद्रेशदासरचिताः उपनिषदः श्रीमद्भगवद्गीता ब्रह्मसूत्रं चेति कृत्स्नप्रस्थानत्रय्या स्वामिनारायणाऽऽख्यभाष्यग्रन्थास्तस्य प्रत्यक्षमुदाहरणम्। साधुभद्रेशदासेन समग्रविश्वस्य कृते प्रदत्तोऽयं महान् अभिनवज्ञानरत्नसभरज्ञानमञ्जूषारूप उपहार एव। एतत्कार्यं मया न केवलं सम्प्रदायदृष्ट्याऽवलोक्यतेऽपि तु वैदिकसनातनधर्मपरम्परायाः संस्कृतभाषासाहित्यस्य प्रौढवेदान्तवादपरम्परायाश्चेयं महती सेवेति भावनयाऽवलोक्यते। विद्वद्दृष्ट्या च निरीक्ष्यते। अत एव समुचितशास्त्रीयप्रणाल्या शास्त्रीयसंस्कृतभाषया च प्रणीतानामेतेषां भाष्यग्रन्थानामहं गौरवेणाऽभिवादनं करोमि मे स्नेहाऽऽशिषश्च निवेदयामि।

स्वामिनारायणप्रबोधिताऽपूर्वसिद्धान्ताः

वेदान्तदर्शने शङ्कररामानुजमध्वादिप्रतिपादितेषु सिद्धान्तेषु क्वचित् केनचिदंशैः साधर्म्यसत्त्वेऽपि तत्त्वसंख्या तत्स्वरूपं मुक्तेर्लक्षणं तत्साधनमित्यादिविषयेषु वैशिष्ट्यदर्शनात् तैस्तैः विलक्षणसिद्धान्तैस्तत्तत्सम्प्रदायरूपेण स्वीयं विशिष्टं स्थानं जगति बिभ्रति। एवमेव स्वामिनारायणसम्प्रदायविषयेऽवगन्तव्यम्। इतः प्रायः २३० वर्षपूर्वं जगत्यस्मिन्नवतीर्णाः श्रीस्वामिनारायणभगवत्पादाः स्वीयान् वैदिकब्रह्मविद्याविषयकान् विचारान् सिद्धान्तरूपेण स्वाश्रितेभ्य उपदिदिशुः। तेषु च सिद्धान्तेषु तत्प्राग्भवसम्प्रदायाऽभ्युपगतसिद्धान्तैः क्वचित् केनचिदंशेन साम्यसत्त्वेऽपि प्रागुक्ततत्त्वसंख्यादिविषयेषु भूरिभेदप्रदर्शनात् सम्प्रदायोऽयं स्वविलक्षणतात्त्विकसिद्धान्तैः स्वीयं विशिष्टं स्थानं बिभर्त्येवेति तत्त्वजिज्ञासुभिरवश्यमवधेयम्।

स्वामिनारायणेतिभाष्याऽभिधानतात्पर्यम्

यद्यपि श्रीस्वामिनारायणैः स्वयं कस्याऽप्युपनिषद्गीतादिशास्त्रस्य भाष्यव्याख्यानादिकं नैव प्रणीतमपि तु स्वीयोपदेशे तैर्वारं वारमनेकेषामुपनिषद्गीतादिशास्त्राणां वाक्यान्युद्धृत्य तेषामर्थाः स्वीयाऽवलोकनदृष्ट्या प्रदर्शिताः। ते चेमेऽर्थास्तत्प्राग्भवशङ्कररामानुजादितत्तत्सम्प्रदायप्रवर्तकाऽऽचार्यप्रतिपादिततत्तद्वाक्यार्थतो भिन्ना अत एवाऽपूर्वा नूतनाश्चाऽऽसन्नित्यस्य सम्प्रदायस्य स्वीयं विशिष्टं तत्त्वदर्शनमस्तीति जगति बहवो न विजानन्ति। तेषां चाऽपूर्वसिद्धान्तानां सम्यगालोडनपूर्वकं समग्रप्रस्थानत्रय्यादिग्रन्थराशेः पुनः स्वामिनारायणप्रेरितविशिष्टदृष्ट्या परिशीलनमावश्यकमासीत्। ततश्च स्वसम्प्रदायवैशिष्ट्यप्रस्थापकानां नूतनभाष्यग्रन्थानां प्रणयनमनिवार्यम्। अत्राऽयं वेदान्तविदुषां महत आनन्दस्य विषयो यत् साधुभद्रेशदासैः स्वामिनारायणोपदिष्टाऽपूर्ववेदान्तसिद्धान्तप्रतिपादकान् उपनिषद्भगवद्गीताब्रह्मसूत्रेतिसम्पूर्णप्रस्थानत्रय्या भाष्यग्रन्थान् प्रणीय स्वामिनारायणप्रबोधितदर्शनस्य दर्शनाऽन्तरेभ्यो विलक्षणत्वं वैशिष्ट्यं च सर्वजनाऽऽलोकेऽवतारितम्।

भाष्यकारैः स्वयमेव ब्रह्मसूत्रभाष्याऽऽरम्भप्रसङ्गे स्वामिनारायणेतिभाष्याऽभिधानतात्पर्यमुद्घाटितम् "स्वामिनारायणेनेह सिद्धान्तो यः प्रकाशितः। तस्यैव सर्वथा सम्यगिहानुसरणं यतः॥ यस्माच्च दिव्यमन्त्रोऽयं स्वामिनारायणेति यः। ब्रवीति ब्रह्मविद्यास्थौ ह्यक्षरपुरुषोत्तमौ॥ तस्माद्धि संज्ञितं भाष्यं स्वामिनारायणाऽऽख्यया। प्रसीदतु सदा साक्षात्स्वामिनारायणो हरिः॥" (ब्र.सू.स्वा.भा.पत्र.सं.१) इति।

तत्र च ये तदितराऽद्वैतविशिष्टाद्वैतादिदर्शनोक्तविलक्षणसिद्धान्ताः प्रस्थानत्रय्याः स्वामिनारायणाऽऽख्यभाष्य-ग्रन्थेषु प्रतिपादितास्तेषु द्वित्राः संक्षिप्येह प्रदर्श्यन्ते।

कतिपया विशिष्टाः सिद्धान्ताः

तत्त्वगणना – तत्त्वपञ्चकम्

यथाऽद्वैतदर्शने ह्येकमेव ब्रह्मतत्त्वं परमार्थतोऽङ्गीकृतम्। तद्भिन्नस्य च मिथ्यात्वम्। यथा वा विशिष्टाद्वैतदर्शने चिदचिदीश्वरेति तत्त्वत्रयमभ्युपगतम्। तथा स्वामिनारायणदर्शने जीवः ईश्वरो माया अक्षरब्रह्म परब्रह्म चेति तत्त्वपञ्चकं नित्यं परस्परं भिन्नं परमार्थतोऽङ्गीकृतम् (के.उ.स्वा.भा.२/४)। तानि चेमानि पञ्च तत्त्वानि

तत्र तत्र प्रस्थानत्रयीस्वामिनारायणभाष्ये प्रतिपादितानि। पञ्चस्वप्येतेष्वक्षरब्रह्मपरब्रह्मेतिद्विविधब्रह्मप्रकाशनं स्वामिनारायणेतरवैदिकसम्प्रदायसिद्धान्तदृष्ट्याऽतीव विलक्षणमेवेति स विषय इह विदुषां विशेषविज्ञप्तये किञ्चिद्विस्तरेण विलिख्यते।

उपनिषत्स्वामिनाराणभाष्ये ब्रह्मविद्यानिरूपणम् – अक्षरपुरुषोत्तमदर्शनम्

ब्रह्मद्वयसिद्धान्तो हि दर्शनस्यास्य प्रमुखं वैशिष्ट्यम्। ब्रह्मज्ञानविषये यथाऽद्वैतदर्शने एकमेव निर्गुणं निर्विशेषं च ब्रह्माङ्गीकृतं, यथा वा ब्रह्मशब्देन दिव्यगुणगणविशिष्टः पुरुषोत्तमोऽभिधीयते इति विशिष्टाद्वैतदर्शने प्रतिपादतं, तथा दर्शनेऽस्मिन् ब्रह्मशब्देन न केवलं परमात्मैवाऽपि तु अक्षरब्रह्म परब्रह्मेति दिव्यतत्त्वद्वयस्य स्वीकार इति प्रधानो भेदो दर्शनान्तरतः। इत्थं हि भगवत्स्वामिनारायणानामेतद्विषयकवाक्यानि "अथ ब्रह्मज्ञानमार्ग इदं वेदितव्यं यद् ब्रह्म तु निर्विकारं निरंशं च वर्तते, नैव विकारं प्राप्नोति नैव चाऽपि भवन्ति तदंशाः। तदिदं ब्रह्म प्रकृतिपुरुषादिसर्वेषामपि कारणमाधारश्चेति यद्भवेत् कारणमाधारश्च तत्तु नैव भवेत् कार्यात् पृथगित्यभिप्रायमुद्दिश्यैव शास्त्रेषु ब्रह्मणः सर्वरूपत्वमुच्यते, तदिदं ब्रह्म विकारं प्राप्य चराऽचरजीवरूपं भवतीति न च वाच्यम्। तस्माच्च ब्रह्मणः पृथगेव वर्तते परब्रह्मपुरुषोत्तमो नारायणः। स ब्रह्मणोऽपि कारणमाधारः प्रेरकश्चाऽस्ति। इत्येवं विज्ञाय स्वजीवात्मानं तेन ब्रह्मणा सहैकीकृत्य परब्रह्मणः स्वामिसेवकभावेनोपासनं कर्तव्यमित्येवंरूपेण ज्ञाते सति ब्रह्मज्ञानमपि परमपदप्राप्तौ निर्विघ्नः पन्था भवति (वच.ग.म.३)" इति।

इदमत्र ध्यानाऽऽवहं यद् ब्रह्मद्वयस्वीकारेऽपि ते द्वे ब्रह्मणी न समाने। एकमक्षरब्रह्म तद्धि द्वितीयात् परब्रह्मणो न्यूनं तदधीनं च। परब्रह्म त्वक्षरब्रह्मणोऽपि परभूतं तन्नियमकं च। अक्षरब्रह्मणः परत्वादेव खलु परमात्मा परं ब्रह्मेति व्यपदिश्यत इति तदीयोपदेशभावः।

अनेन हि ब्रह्मद्वयविचारेण स्वामिनारायणप्रबोधितब्रह्मविद्योपदेशः "अक्षरपुरुषोत्तमदर्शनम्" इति, "अक्षरपुरुषोत्तमसिद्धान्तः" इति वा प्रथितः।

"येनाऽक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" (मुं.१/२/१३) इति मुण्डकोपनिच्छ्रुतिर्ब्रह्मविद्यालक्षणतयेह प्रतिपादिता। तत्र च "ह्यक्षरात् परतः परः" (मु.२/१/२) इत्युत्तरवाक्याऽनुरोधेनाऽक्षरपदमिह परमात्मभिन्नं ब्रह्मतत्त्वं पुरुषपदं च परब्रह्मतत्त्वमभिधत्ते इति निर्णीय अक्षरब्रह्मपरब्रह्मेतिदिव्यतत्त्वद्वयाऽवबोधे कात्स्न्यं भजते ब्रह्मविद्येति फलितार्थो भाष्ये प्रतिपादितः। इत्थं हि तत्रत्यं भाष्यम् "**येन** अध्यात्मविज्ञानेन ब्रह्मविद्ययेति यावद् **अक्षरं** तदक्षरमधिगम्यते (मु.१/१/५) इत्यादिनोपक्रान्तमद्रेश्यत्वादिदिव्यगुणगणजुष्टं ब्रह्माऽपरनामाऽक्षरतत्त्वं, **पुरुषं** पुरुषशब्दवाच्यं यत्राऽमृतः स पुरुषः (मु.१/२/११)" इत्यादिनोक्तं, "दिव्यो ह्यमूर्तः पुरुषः" (मु.२/१/२) इत्यादौ च वक्ष्यमाणं पुरुषोत्तमतत्त्वं **सत्यं** यथावद् **वेद** जानीयात् **तां** तादृशीं श्रेयस्करीं **ब्रह्मविद्यां** ब्रह्मपरब्रह्मविषयिणीं परविद्यां तत्त्वतः तदुभयस्वरूपस्वभावादियथावन्निरूपणसभरतया सर्वाङ्गसम्पूर्णतया च प्रोवाच प्रब्रवीतीत्यर्थः" इति।

स चाऽयं ब्रह्मद्वयसिद्धान्तो दशस्वप्युपनिषत्सु सम्यक् प्रतिपादितः।

यथेशावास्योपनिषदि "ईशावास्यमिदं सर्वम्" (ई.१) इति मन्त्रभाष्याऽवसरे प्राह "**ईशे** ईष्टे प्रशास्ति नियमयति प्रकृतितत्कार्यादीतीट्, तेनेशा। ईशितृत्वशालिनेत्यर्थः। ईशितृत्वमिदमक्षरब्रह्मणः परब्रह्मणश्च वेदान्तसिद्धम्।.... अत ईशेत्यस्य सकलजगत्प्रशासकेनाऽक्षरब्रह्मणा परब्रह्मणा चेत्यर्थः" (ई.उ.स्वा.भा.१) इति। श्रुत्यर्थश्चायं तत्र बहुभिरन्योपनिषत्सन्दर्भैः प्रमाणितोऽपि।

केनोपनिषदि च "ब्राह्मीं वाव त उपनिषदब्रूम" (के.४/७) इति मन्त्रभाष्ये ब्राह्मीमितिशब्दो ब्रह्मद्वयवाचकतया भाषितः। तदुक्तं भाष्ये "**ब्राह्मीम्** अक्षरब्रह्मपरब्रह्मसिद्धान्तरूपां ब्रह्मविद्यात्मिकाम् **उपनिषदं वाव** एव **ते** तुभ्यम् **अब्रूम** उक्तवन्तो वयम्" (के.उ.स्वा.भा.४/७) इति।

एवं कठोपनिषद्भाष्येऽपि " तं दुर्दर्शं गूढमनुप्रविष्टम्" इत्यादिना परब्रह्म प्रतिपाद्य "सर्वे वेदा यत् पदमामनन्ति... एतद्ध्येवाऽक्षरं ब्रह्म एतद्ध्येवाऽक्षरं परम्" इत्यादिभिस्तत्परब्रह्मभिन्नमक्षरब्रह्मोपस्थाप्य तदुभयभिन्नमात्मतत्त्वं च

"न जायते म्रियते वा" इत्यादिना प्रतिपादितम्। एवं तत्रैव "यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्। अभयं तितीर्षतां पारं नाचिकेतं शकेमहि" (क.३/२) इति मन्त्रेणाऽक्षरं ब्रह्म संसारतरणोपायतया सेतुरूपेण व्यपदिष्टमिति भाषितम्।

प्रणवोऽपि ह्येतदक्षरब्रह्मपरब्रह्मेतिदिव्यतत्त्वद्वयमभिधत्ते इति "एतद् वै सत्यकाम परं चाऽपरं च ब्रह्म यद् ॐकारः" (प्र.५/२) इति प्रश्नोपनिषद्भाष्ये प्रतिपाद्यते। तत्र परं ब्रह्मेति परमात्मा अपरं ब्रह्मेति च तस्मात् परमात्मनोऽपरं भिन्नं न्यूनं चाऽक्षरं ब्रह्माभिधीयत इति भाषितम्।

मुण्डके च प्रागुक्तदिशा "येनाऽक्षरं पुरुषं वेद" (मु.१/२/१३) इति मन्त्रभाष्यावसरे तथा च "दिव्यो ह्यमूर्तः पुरुषः" (मु.२/१/२) इति पुरुषपदवाच्यपुरुषोत्तमनिरूपणप्रसगे "ह्यक्षरात् परतः परः" (मु.२/१/२) इति श्रुत्यर्थनिरूपणाऽवसरे परभूतादक्षरादपि परभूतः पुरुषोत्तम इति प्रतिपादितम्। इत्थं हि तत्रत्यं भाष्यम् " हि शब्दो निश्चयार्थः। परतः परशब्दात् पञ्चम्यास्तसिल्। जीवेश्वरमायाब्रह्मरूपमुक्तादिसर्वेभ्यः परभूतादित्यर्थः।... अक्षरात् पूर्वं परविद्याऽधिगम्यतयोक्तादक्षराऽऽख्यदिव्यतत्त्वादपि हि अवश्यमेव परः परभूतः सः पुरुषः परमात्माऽस्ति।" (मु.उ.स्वा.भा.२/१/२) इति।

माण्डूक्येऽपि "अयमात्मा ब्रह्म" (मा.१/२) इति वाक्यं प्रत्यगात्माऽक्षरब्रह्मैक्यतयैव प्रतिपाद्य "संविशत्यात्मनाऽऽत्मानं य एवं वेद" (मा.४/१) इत्यत्र लब्धाऽक्षरब्रह्मरूपस्य परमात्मप्राप्तिः प्रतिपादिता। तदुक्तं तद्भाष्ये "साक्षाद्ब्रह्मस्वरूपगुरुप्रसंगोपदेशकृपया स्वयमपि त्रिगुणदेहत्र्यवस्थाऽतीतो ब्रह्मरूपश्च भूत्वा परमात्मसहजानन्दसाक्षात्कारं लभत इति भावः" (मा.उ.स्वा.भा.४/१) इति।

एवं तैत्तिरीये च ब्रह्मविदाप्नोति परम् (तै.२/१/१) इत्यानन्दवल्लीमन्त्रेणाऽप्येतत्तत्त्वद्वयं प्रतिपाद्य ब्रह्मरूप आत्मैव परब्रह्माऽऽप्तौ तदुपासने चाऽधिकारी भवतीति नियमः प्रस्थापितः।

ऐतरेयोपनिषद्यपि "कोऽयमात्मेति वयमुपास्महे" (ऐ.३/१) इत्यत्र परब्रह्मण उपास्यत्वं प्रतिपाद्य "प्रज्ञानं ब्रह्म" (ऐ.३/३) इत्यादिवाक्यानां ज्ञानस्वरूपमक्षरब्रह्मपरत्वं प्रदर्श्य परब्रह्मोपासनेऽक्षरब्रह्म-भावाऽनिवार्यता भाष्य उपस्थापिता। एवमब्रुवन् भाष्यकाराः "परमात्मा सहजानन्द एव परमोपास्य इति तु सर्ववेदान्तसिद्धान्तः किन्तु नहि यथावत्तदुपासनमृते जीवात्मनोऽक्षरब्रह्मभावाच्छक्यमित्यपि स्फुटो वेदान्तोपदेशः। अथाऽतस्तदुपासनाऽधिकारसिद्ध्यर्थमुपासकात्मनि साक्षादक्षरब्रह्मैक्यसम्पादनौपयिकतया सर्वस्याऽक्षरब्रह्मात्मकत्वं प्रतिपादयति"(ऐ.उ.स्वा.भा.३/२) इति।

छान्दोग्येऽप्यष्टमाऽध्याये "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद् वाव विजिज्ञासितव्यम्" (छा.८/१/१) इत्याद्युपक्रान्तदहरविद्याया भाष्ये दहराऽऽकाशशब्देन ह्यक्षरं ब्रह्म प्रतिपाद्य तदन्तःस्थतया परं ब्रह्म च प्रदर्श्य तदुभयमन्वेष्टव्यं विजिज्ञासितव्यमिति प्रस्थापितम्। इत्थं हि भाष्यवचनम् "अनेनाऽक्षरब्रह्मपरब्रह्मोभयविषयिणी जिज्ञासा विधीयते" (छा.उ.स्वा.भा.८/१/१) इति ।

एवं बृहदारण्यकेऽपि तृतीयाऽध्याये सप्तमेऽन्तर्यामिब्राह्मणे परब्रह्मणः सर्वाऽन्तर्यामित्वतन्नियामकत्वादि निरूप्याऽष्टमे ब्राह्मणे परब्रह्मनित्येच्छया ह्यक्षरब्रह्मणोऽपि तदस्तीति तद्भाष्ये "एतद् वै तदक्षरं गार्गि ब्रह्मणा अभिवदन्ति" (बृ.३/८/८) इत्यदादिभिरारभ्य "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः " (बृ.३/८/९) इत्यादिभिस्तन्माहात्म्यं प्रदर्श्य " यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात् प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात् प्रैति स ब्राह्मणः" इत्यादिभिश्च तद्वेदनाऽऽवश्यकतां चोपस्थाप्य "एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" (बृ.३/८/११) इत्यन्तेन सविस्तरं प्रतिपादितम्।

एवं सर्वास्वपि दशसूपनिषत्सु ब्रह्मद्वयसिद्धान्तः सहजं स्फुटं शास्त्रीयपद्धत्यैव च प्रस्थाप्यते इति नूनं विद्वज्जनसमादरावहम्।

श्रीमद्भगवद्गीतास्वामिनारायणभाष्ये अक्षरपुरुषोत्तमसिद्धान्तः

श्रीस्वामिनारायणानां सिद्धान्तोऽयं गीताशास्त्रमनुसृत्य "अक्षरपुरुषोत्तमसिद्धान्तः" इति यदुच्यते तदन्वर्थमेव। यतो ह्युपनिषदुक्तब्रह्मद्वयसिद्धान्त एव पुनर्भगवद्गीतावाक्यैः प्रमाणीकृत्य श्रीमद्भगवद्गीतास्वामिनारायणभाष्ये

दृढायितः। यथा "किं तद् ब्रह्म" (गी.८/१) इति पार्थजिज्ञासायाम् "अक्षरं ब्रह्म परमम्" (गी.८/३) इति पार्थसारथेः प्रतिवचनम्। तदिदमक्षरं ब्रह्म न परब्रह्म न वा जीवात्मेत्यादि तद्भाष्यप्रतिपादितम्। एवं हि तत्रत्यवचनम् "**परमं** परमात्मातिरिक्तसर्वजीवेश्वरमायातन्मुक्तेभ्यः सर्वदा स्वरूपस्वभावशक्तिसामर्थ्यादिना परभूतम् **अक्षरम्** एव **ब्रह्म** ब्रह्मतत्त्वमुच्यत इत्यर्थः।" (गी.स्वा.भा.८/३) इति। ततश्च तत्राऽक्षरं ब्रह्मेतिशब्दयोर्व्युत्पत्तिं व्याकरणशास्त्रसम्मतां प्रदर्श्य सविस्तरं नैकविधश्रुतिस्मृतिवाक्यैः सुयुक्तिभिश्च परमात्मजीवादीनामक्षरब्रह्मशब्दवाच्यत्वं नेति साधूपपादितम्। अक्षरशब्दोऽयं नैव पुरुषोत्तमपर इति प्रस्थापयितुं पञ्चदशाऽध्यायस्य पुरुषोत्तमयोगाऽभिधस्य श्लोकत्रयमुपस्थाप्यते। तदुक्तं गीतासु " द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। य लोकत्रमाविश्य बिभर्त्यव्यय ईश्वरः॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ " (गी.१५/१६-१८) इति। इह जीवेश्वरसमूहानीदानीं पूर्वं वा यदा कदाऽपि क्षरणस्वभावाऽचित्संसर्गप्राप्तत्वात् क्षरशब्दाऽभिलप्यानि, नित्यं प्रकृतिसंसर्गवियुक्तं प्रागुक्तजीवेश्वरसमूहपरभूतमक्षरं ब्रह्म कूटः शीलाराशिः पर्वतः इव तिष्ठतीति नित्यं विकाररहिततयाऽवस्थितं कूटस्थशब्दाऽभिलप्यं चेत्युपपाद्य क्षराऽक्षरोभ्यभिन्नस्तत्परभूतश्च परमात्मैव पुरुषोत्तमशब्दाऽभिलप्य इति भाष्ये भगवद्गीताशब्दाऽनुगुण्येन प्रस्थापितम्।

ब्रह्मसूत्राणि

ब्रह्मसूत्रैरपि भाष्यकारा अक्षरपुरुषोत्तमसिद्धान्तप्रतिपादने साफल्यं लब्धवन्तः। "अथातो ब्रह्मजिज्ञासा" (ब्र.सू.१/१/१) इति प्रथमसूत्रे एव विविधैः श्रुतिस्मृतिवचनैः सूत्रस्थं ब्रह्मपदमक्षरब्रह्मपरब्रह्मेति-तत्त्वद्वयाभिधायकमिति प्रसाधितम्। तत्राऽपि ब्रह्मणोर्जिज्ञासा ब्रह्मजिज्ञासेति द्विवचनाऽन्तेन विग्रहेणैव ब्रह्मद्वयसिद्धान्तं भाष्यकाराः सूत्रकाराऽभिमततया प्रस्थापितवन्तः। तदुक्तं ब्रह्मसूत्रभाष्ये "ब्रह्मशब्देनेह सकलवेदान्तोदितब्रह्मविद्यातत्त्वनिरूपणनिपुणेन भगवता व्यासेनाऽक्षरब्रह्मपरब्रह्मेतिदिव्योभयतत्त्वयो-र्जिज्ञास्यमानत्वेन विवक्षितत्वात्, तथैव श्रुत्यवबोधितत्वाच्च ब्रह्मणोरिति द्विवचनान्तो विग्रहः। पदार्थभेदेऽपि पदसारूप्याच्चैकशेषः शाब्दिकसमयसिद्धो यथा पार्थपार्थसारथ्युभयविवक्षया कृष्णाविति भारते (म.भा.आ.प.२२१/३३) दाशरथिवासुदेवाऽग्रजोभयविवक्षया वदन्ति लोके रामयोरिति तथेहाऽपि। ब्रह्म च ब्रह्म चेति ब्रह्मणी तयोरिति लौकिको विग्रहः। तत्राऽऽद्यं शक्त्याऽक्षरतत्त्वं द्वितीयं च पुरुषोत्तमतत्त्वं ब्रवीतीति भवति तदुभयलाभः।" (ब्र.सू.स्वा.भा.१/१/१) इत्यादि।

एवमुत्तरत्राऽपि ब्रह्मसूत्रे भाष्यकाराः जगत्कारणताविचारे तत्तदधिकरणेषु ब्रह्मद्वयसिद्धान्तं प्रसाधितवन्तः। तत्राऽपि विशिष्य अदृश्यत्वाऽधिकरणं द्युभ्वाद्यधिकरणम् अक्षराऽधिकरणं दहराऽधिकरणं चेत्याद्यधिकरणानि तत्तदधिकरणविषयभूतश्रुतिवाक्यैरक्षरब्रह्मपरतया प्रौढतया प्रतिपादितानि।

इत्थं बहुषु विशिष्टेषु सिद्धान्तेषु सत्स्वपि तेभ्यः प्रमुखा अत्रोल्लिखिताः।

एवं शङ्कररामानुजवल्लभादिप्राक्तनाऽऽचार्यप्रवरप्रतिपादितेभ्योऽद्वैतविशिष्टाद्वैतशुद्धाऽद्वैतादिदर्शनेभ्यो विलक्षणत्वाद् भगवत्स्वामिनारायणप्रबोधितस्य दर्शनस्याऽस्य "अक्षरपुरुषोत्तमदर्शनम्" इत्यन्वर्थैव संज्ञेत्यहं मन्ये। श्रीमद्भगवद्गीतानुसारेण चाऽयं सिद्धान्तः "अक्षरपुरुषोत्तमसिद्धान्तः" इति वक्तव्ये सत्यतैव संपुष्टा भवति। अत एव "अक्षरपुरुषोत्तमसिद्धान्तलक्षणब्रह्मविद्यानिरूपक.." (ई.स्वा.भा.१८, ब्र.सू.स्वा.भा.१/४/२९) इत्येवं रूपेणाऽयं सिद्धान्तो यद्ब्रह्मविद्याऽपरपर्यायतयोपयुज्यते सर्वत्र प्रस्थानत्रय्यां प्रकरणाद्यन्ते तदपि वेदान्तशास्त्राऽनुकूलं विदुषां स्वामिनारायणीयमतसंग्राहकमेव वरीवर्ति।

भाष्यवैशिष्ट्यम्

अथ भाष्यशैल्यादिविषये मम भावानुद्घाटयितुंकामोऽहम्।

अपूर्वता भाष्यस्याऽस्य विदुषां ध्यानाकर्षको गुणः। यथोपनिषत्सु कठे "ऋतं पिबन्तौ सुकृतस्य लोके"

(कठ.३/१) इत्यत्रर्तपानकर्तृतया प्रत्यगात्माऽक्षरब्रह्मणी प्रतिपादिते। एवं मुण्डके "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" (मु.३/१/१) इतिमन्त्रे बद्धात्माऽक्षरब्रह्मणोर्ग्रहणमित्याद्यपूर्वम्।

गीताभाष्येऽपि द्वितीयाऽध्यायप्रथमश्लोके शरीरत्रयवर्णनमश्रुतपूर्वं समर्थितम्। "बुद्धिर्योगे त्विमां श्रुणु" (गी.२/३९) इत्यत्र योगशब्दस्य परमात्मस्वरूपनिष्ठापरत्वम्, "एषा ब्राह्मी स्थितिः" (गी.२/७२) इत्यस्य ब्रह्मगुणसाधर्म्याऽऽप्तिपरत्वम्, "यदा यदा हि धर्मस्य" (गी.४/७) इत्यादौ धर्मपदस्य भागवतधर्मपरत्वम्, अष्ट च दश चेति गीताऽध्यायविवेकः (गी.स्वा.भा.८/२८), द्वादशे "क्लेशो ह्यधिकतरस्तेषामव्यक्तासक्तचेतसाम्" (गी.१२/५) इत्यत्र अव्यक्तेऽक्षरे ब्रह्मण्यसक्तं चेतो येषां तेऽव्यक्तचेतसस्तेषामिति विग्रहकरणमित्याद्यपूर्वम्।

ब्रह्मसूत्रेष्वपि प्रथमसूत्रे एव ब्रह्मणोर्जिज्ञासेति द्विवचनान्तो विग्रहः। ईक्षत्यधिकरणे तदैक्षत बहु स्यां प्रजायेय इति श्रुतावीक्षतेः श्रवणात् तेन हेतुना परमात्मसाकृतिकत्वसाधनम्। तदुक्तं भाष्ये "श्रूयमाणमीक्षणं हि चेतनधर्मो जडस्य प्रधानस्य जगत्कारणत्वबोधकवाक्ये सच्छब्दवाच्यतां वारयति। न केवलं वारयत्यपि तु सच्छब्दवाच्यस्य जगत्कारणस्य दिव्यनेत्रादिकरणकलेवरात्मकं साकृतिकत्वं प्रस्थापयत्यपि" (ब्र.सू.स्वा.भा.१/१/५) इति। एवमेव अन्तस्तद्धर्माधिकरणेऽपि "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" (छा.१/६/६,७) इति विषयवाक्यविमर्शाऽवसरे "इत्थमिह परमात्मैव साकृतिकत्वेन निरूपितः" (ब्र.सू.स्वा.भा.१/१/२१) इति भाषितम्। अपि च उत्पत्त्यसम्भवाधिकरणेऽपि "उत्पत्त्यसम्भवाद्, न च कर्तुः करणम्, विज्ञानादिभावे वा तदप्रतिषेधः, विप्रतिषेधाच्च" (ब्र.सू.२/२/४२-४५) इति चतुःसूत्री पञ्चरात्राऽऽगमविषयकतया न निरूपिताऽपि तु चार्वाकाऽभिमतस्वभावकारणवादखण्डनपरतयेत्यपूर्वेयमर्थयोजना वेदान्तविचक्षणानां साश्चर्यमहोभावमुद्भावयति। एवं प्रत्यध्यायं प्रतिपादं च ब्रह्मसूत्रेषु शङ्कररामानुजादिप्राक्तनाऽऽचार्यप्रतिपादिताऽर्थेभ्यो भिन्नतया सूत्रशब्दार्थाः सप्रमाणं सयुक्तिकं च प्रदर्शिता इति स्फुटमवलोकयितुं शक्यम्।

इत्थमौचित्यपूर्णाऽपूर्वतया वैशिष्ट्यमावहतीदं भाष्यम्।

भाष्यं चेदं सम्पूर्णं शास्त्रयां पद्धतिमनुसरति। यथा ब्रह्मसूत्रभाष्याऽवसरे विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरमित्याद्यधिकरणनियमः सर्वत्राऽनुसृतः। आवश्यकतामभिलक्ष्योपनिषदादिषु प्रकरणार्थोपबृंहकतया शास्त्रान्तरप्रमाणान्युद्धृतानि। यथा "सर्वे वेदा यत्पदमामनन्ति" (कठ.२/१५) इति कठमन्त्रभाष्याऽवसरे सकलवेदगतोपनिषत्सन्दर्भाः सन्दर्शिताः। सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् (ब्र.सू.३/३/१) इति सूत्रभाष्ये च भूरि वेदान्तवाक्यान्युपस्थापितानि। ब्रह्मसूत्रद्वितीयाऽध्यायद्वितीयपादस्थसूत्रभाष्ये भाष्यकाराणां चार्वाकबौद्धजैनसांख्ययोगन्यायवैशेषिकादिविविधदर्शनदक्षत्वं विद्यावतां विस्मयजनकम्। वाक्यप्रणयनशैल्यपि शङ्करादिप्राचीनाऽऽचार्याणामिव व्याकरणपरिशुद्धा सत्तर्कविभूषिता प्रासादिकी अर्थगभीरा श्रवणमधुरा द्वेषशून्यविमर्शपरा च। केवलं परमात्मकृपया गुर्वनुग्रहेणैवेदं सर्वमेकत्र सम्मिलितं भवतीति नूनमाचार्यभद्रेशदासाः तां कृपामनुग्रहं च लब्धवन्त इति सौभाग्यशालिन एव। अहं तेषां गुरुवर्येभ्यः श्रीप्रमुखस्वामिमहाराजेभ्योऽपि धन्यवादान् निवेदयामि सादरं प्रणमामि च यत्तैरेते भद्रेशदासा भाष्यप्रणयनकार्ये प्रेरिताः। एतादृशान् जीवतो युवाऽवस्थाऽवस्थितान् भाष्यकारान् दृष्ट्वाऽत्यन्तं प्रमोदप्लावितं मे चेतः। नूनं भारतवर्षस्य सांस्कृतिकं भावि गौरवाऽऽढ्यमिति निश्चप्रचमिति शम्।

हस्ताऽक्षराणि



Dr. N. S. Ramanuja Tatacharya

Navi Mumbai, India

TRANSLATION

Of the four endeavours: the pursuit of righteousness (*dharma*), the acquisition of material objects (*artha*), the fulfilment of desire (*kāma*), and the attainment of liberation (*mokṣa*); acquiring liberation is regarded by all to be pre-eminent. This liberation or *mokṣa* is attained by *brahmavidyā*, which is characterized as the *upāsanā* of *Paramātman*. The nature of *brahmavidyā* and the means of its attainment has been propounded within *Vedānta*. This is acknowledged by all Vedāntīns. A sacred text by which *brahmavidyā* is established is known as a *prasthāna*. Within the Indian Vedānta tradition, all followers of Vedānta equally accept the *Prasthānatrayī* as authoritative. The *Prasthānatrayī* is a collection of the following three established scriptures (*prasthāna*): the Upanishads, the *Bhagavadgītā*, and the *Brahmasūtras*.

PRASTHĀNATRAYĪ

Within Vedānta, the authority of the Upanishads is foremost. The term 'Upaniṣad' is derived from conjoining the two prefixes 'उप' and 'नि' to the base root √सद्लृ. "'Upaniṣadyate' means to attain or to know *brahmavidyā*," thus an Upaniṣad is that by which *brahmavidyā* can be known or attained. Of the over one hundred Upanishads contained within the Vedas, the Īśa Upaniṣad, etc. are renowned. The verse, "ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥"[1] enumerates these ten Upanishads. Within the Vedas and these ten Upaniṣads, *brahmavidyā* is the primary subject of elucidation. These Upaniṣads are known as being part of the *Prasthānatrayī*; and are celebrated as the *śrutiprasthāna*.

The second *prasthāna* is the *Śrīmadbhagavadgītā*. It consists of seven hundred verses and is located in the eighteenth chapter (*adhyāya*) of the "Bhīṣmaparva" of the *Mahābhārata*. At the end of each chapter, the statement, "इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे..."[2] reminds us that the *Gītā* is itself an Upaniṣad. The statement also reveals *brahmavidyā* as a central theme of the *Gītā* and that the *Gītā* is a sacred text on yoga. The well-known verse "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महद्॥"[3] further attests that the sacred text contains the liberating *brahmavidyā* propounded in the Upanishads. Additionally, since the text is found within the *Mahābhārata* it is also historic. The divine conversation between Arjuna and his charioteer Kṛṣṇa on the battleground has been compiled by the author of the *Mahābhārata*. Therefore, the *Gītā* is well known as the *smṛti prasthāna*.

The *Brahmasūtras* form the third established text (*prasthāna*). It consists of

1. "īśakenakaṭhapraśnamuṇḍamāṇḍūkyatittiriḥ. aitareyaṃ ca chāndogyaṃ bṛhadāraṇyakaṃ daśa॥"
2. "iti śrīmadbhagavadgītāsūpaniṣatsu brahmavidyāyāṃ yogaśāstre..."
3. "sarvopaniṣado gāvo dogdhā gopālanandanaḥ. pārtho vatsaḥ sudhīrbhoktā dugdhaṃ gītā'mṛtaṃ mahad॥"

aphorisms created by Bādarāyaṇa. It presents a truthful cohesive exposition of the proclamations of Vedānta by utilizing logical and skilled discussions of the precepts explained by the śrutis and *smṛtis*. Also captured in its aphorisms are thoughts on the creation of the world. In addition, it presents a considered refutation of the principles that are contrary to those of Vedānta. It describes endeavours that are aimed towards liberation, in addition to an exposition on the nature of liberation. Consequently, by its inclination to debate various principles, it is proclaimed as the sacred text of reason (*tarka prasthāna*).

THE BHĀṢYA TRADITION

The *bhāṣya* or commentarial tradition has its origins in ancient India. Commentaries on the Vedas and their ancillary texts by Uvvaṭa, Mahīdhara, Sāyaṇa, and Skandasvāmi amongst others; elucidations on Sanskrit grammar by Pāṇinī and others; commentaries on historical texts such as the *Rāmāyaṇa*; expositions on the *Purāṇa* texts such as the *Bhāgavata*; commentaries on the aphoristic treaties of the six schools of thought including Sāṃkhya, Yoga, Nyāya, Vaiśeṣika and Vedānta are all well known.

Amongst these, especially in the branches of Vedānta, novel philosophical conceptualizations continually transpire. In the past, eminent *ācāryas* such as Śaṅkara, Rāmānuja, Madhva, and Vallabha have put forth immense effort to establish Advaita, Viśiṣṭādvaita, Dvaita, and Śuddhādvaita, respectively. They have done this by composing commentarial texts based on the *Prasthānatrayī* according to their own teachings and corresponding schools of thought. The continual composition of these texts is a true testimony to the developed thinking and cognitive independence that has always been present in India.

AN INNOVATIVE COMMENTARY OF THE 21ST CENTURY

The significance of the legacy of deep, reflective thought of India's *Vaidika Sanātana Dharma* is that although the commentarial tradition is classical, it still adorns society by its impressive and imaginative discoveries. Bhadreshdas Swami' complete commentary on the *Prasthānatrayī*, entitled the *Svāmināràyaṇabhāṣya*, is exemplary of this continued tradition. The work presented by Bhadreshdas Swami is a monumental exposition of a novel philosophy and is a priceless contribution to the world.

I have examined the text, not merely from a *sāmpradāyika* viewpoint, but also from a literary Sanskrit perspective that is characteristic of the traditional *Vaidika Sanātana Dharma*, and from a developed Vedānta dialectic viewpoint. I have found it to be of great service to the development of both. I have also found it to be useful to all due to its richness in spiritually elevated thoughts. I have also observed it from a scholarly perspective, and by my evaluation, I highly praise the commentary's classical style and Sanskrit diction. I offer it my great, affection-filled blessings.

THE NOVEL PHILOSOPHICAL PRINCIPLES OF SWAMINARAYAN

Although some of the principles of Śaṅkara, Rāmānuja, Madhva and others of the Vedānta tradition are similar to one another, there are many principles - including those on the number of fundamental entities, their form and nature, the description of soteriology, and the means for attaining liberation - that are characteristic of these schools of thought, and hence, distinguish them from one another.

The Svāminārāyaṇa tradition is also to be understood as being distinct for these same reasons. Approximately 230 years ago, the respected Swaminarayan (Svāminārāyaṇa) descended upon earth, and was worshipped as the manifest form of Parabrahman. To his disciples he delivered, as philosophical principles, his original thoughts on the *brahmavidyā* of the Vedas. Although there are some principles similar to those of previous schools of thought, there is a great difference between Swaminarayan's philosophy and that of others with regard to the number of fundamental entities and other onto-theological principles. The tradition's characteristic ontology distinguishes the *saṃpradāya* from others and places it on its own level. The nature of this distinction is worthy of exploration for intellectuals.

THE SIGNIFICANCE OF 'SVĀMINĀRĀYAṆA' IN THE COMMENTARY'S TITLE

Although Swaminarayan did not himself compose commentaries on the Upanishads, *Gita*, or any other sacred texts, he often cited and offered his interpretations on them in his discourses. These interpretations of the verses were distinct from those offered by *ācāryas* including Śaṅkara and Rāmānuja, who preceded him and offered their own interpretations according to their respective schools of thought. Swaminarayan's expositions were unprecedented and novel; thus, many were unaware that his *saṃpradāya* had its own distinct philosophy. As a result, it was necessary to survey the new philosophy in its entirety and once again, study the *Prasthānatrayī* through Swaminarayan's perspective. It was also necessary to compose a new commentarial text to establish the *saṃpradāya's* prominence. Those who have studied Vedānta find great pleasure in Bhadreshdas Swami' *Prasthānatrayī* commentary, which expatiates the previously undisclosed Vedānta principles presented within Swaminarayan's teachings. By this exposition, Swaminarayan's advocated *darśana* is made known to be distinct.

The commentator makes evident his intention behind the use of the word 'Svāminārāyaṇa' in the title of the commentary. He states his purpose in the following three verses found in the introduction to the commentary on the *Brahmasūtras*:

स्वामिनारायणेनेह सिद्धान्तो यः प्रकाशितः।
तस्यैव सर्वथा सम्यगिहानुसरणं यतः॥[4]

4. "svāmināŕāyaṇeneha siddhānto yaḥ prakāśitaḥ, tasyaiva sarvathā samyagihānusaraṇaṃ yataḥ||"

यस्माच्च दिव्यमन्त्रोऽयं स्वामिनारायणेति यः।
